योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २६

षड्विंशः सर्गः २६

श्रीवसिष्ठ उवाच ।

इति निर्णीय दैत्येन्द्रो दामव्यालकटान्विताम् ।

सेनां संप्रेषयामास भूतलं देवनाशिनीम् ।। १

दैत्याः सागरकुञ्जेभ्यः कन्दरेभ्यश्च सायुधाः ।

उदगुर्भीमनिर्ह्लादाः सपक्षगिरिलीलया ।। २

रोदसीकोटरं हस्तप्रहारहतभास्करम् ।

दानवाः पूरयामासुर्दामव्यालकटैधिताः ।। ३

अथोत्तस्थुर्निकुञ्जेभ्यः कन्दरेभ्यः सुराचलात् ।

प्रलयान्त इवाक्षुब्धा भीमाः स्वर्वासिनां गणाः ।। ४

देवासुरपताकिन्योस्तद्युद्धमभवत्तयोः ।

अकालोल्वणकल्पान्तभीषणं भुवनान्तरे ।। ५

पेतुः प्रलयपर्यस्तचन्द्रार्का इव दीप्तयः ।

शिरांसि कुन्डलोहयोततेजःपीततमांस्यथ ।। ६

जुघूर्णुर्भटनिर्मुक्तसिंहनादविराविताः ।

प्रलयानिलसंपूरैः स्फुटहासा इवाद्रयः ।। ७

रेणुः शैलशिलातुल्यहेतिघातास्तभित्तयः ।

कुलाचलतटाभीरुविश्रान्तहरिमण्डलाः ।। ८

चेरुः परस्पराघातहतहेतिसमुत्थिताः ।

लोलानलकणाःकल्पविशीर्णा इव तारकाः ।। ९

विलेसू रक्तमांसौघपूर्णैकार्णवतीरगाः ।

कल्पतालवदुत्ताला वेतालास्तालतालिताः ।। १०

प्रस्फुरद्रुधिरासारशान्तपांसुपयोधरे ।

व्योम्नि हेतिहतक्षुण्णा मौलिकुण्डलकोटयः ।। ११

बभूवुर्भास्कराकारैः कल्पभूरुहधारिभिः ।

प्रहारदलिताद्रीन्द्रैर्दैत्यैर्निर्विवरा दिशः ।। १२

जग्मुर्ज्वलदसिप्रान्तवातपातितभित्तयः ।

कणप्रकरतां शैलाः कल्पाग्निदलिता इव ।। १३

देवास्ते च समाजग्मुरश्वमेधैधिता इव ।

असुरानस्त्रविभ्रष्टाञ्जलदानिव वायवः ।। १४

जगृहुस्तानथाक्रम्य जरठासूनिवौतवः ।

तेऽपि ताञ्जगृहुर्मत्तानृक्षारूढानिव द्रुमान् ।। १५

दोर्वृक्षविलसद्धेतिकुसुमाः शस्त्रपल्लवाः ।

रेजुः सुरासुराः फुल्ला वनलोला इव द्रुमाः ।। १६

अन्योन्यं पूरयामासुः शस्त्रपूरैर्दिशो दश ।

वनानि कुसुमव्रातैः सुमेराविव मारुतः ।। १७

घोरं समभवद्युद्धं देवदानवसेनयोः ।

रोदोरन्ध्रोदुम्बरान्तर्महामशकसंघयोः ।। १८

अथोदपतदुत्तालैर्लोकपालेभमण्डलैः ।

कल्पाभ्रस्फूर्जिताकारो दारुणः समरारवः ।। १९

पिण्डग्रहेण नभसि भूभागमिव कुट्टिमम् ।

मुष्टिग्राह्यो महामेघमन्थरोदरपीवरः ।। २०

रथसंपातसंपिष्टशस्त्रशैलरटन्नटः ।

त्रुटद्धृदयनिःसत्त्वकर्कशाक्रन्दघर्घरः ।। २१

प्रलयप्रत्ययोल्लासिकल्पान्तारावबृंहणः ।

द्वादशादित्यसंघट्टद्रवत्काञ्चनपर्वतः ।। २२

ब्रह्माण्डकुण्डसंघट्टात्परावृत्त्या च निर्गतः ।

महास्रोतःपयःपूरः सत्त्वाहत इवाकरः ।। २३

चञ्चत्सपक्षशैलेन्द्रपक्षपातचलद्ध्वनिः ।

कठिनापूरणोद्भूतस्फुटच्छैलेन्द्रकन्दरः ।। २४

मन्दरोद्धतदुग्धाब्धिसंक्षोभसदृशाङ्गकः ।

रतिश्रुद्धुंघुमास्फोटघटितद्वीपजन्तुभूः ।। २५

सेनयोः क्षुब्धयोरासीद्युद्धमुद्धतदानवम् ।

निष्पिष्टनगरग्रामगिरिकाननमानवम् ।। २६

महाहेतिशतच्छिन्नदानवाचलपूर्णदिक् ।

अन्योन्याहतहेत्यादिचूर्णपूर्णाम्बरोदरम् ।। २७

भुशुण्डीमण्डलास्फोटस्फुटन्मेरुशिरःशतम् ।

शरमारुतनिर्लूनदैत्यदेवमुखाम्बुजम् ।। २८

चक्रावर्तशतभ्रान्तदेवदैत्यजरत्तणम् ।

सेनाप्रहारकल्लोलवलनावलिताम्बरम् ।। २९

हेत्युग्रवातनिष्पिष्टपतद्वैमानिकव्रजम् ।

अस्त्रोदिताब्धिवार्योघप्लावितव्योमपत्तनम् ।। ३०

वहन्महास्त्रपातासिशूलशक्तिनदीशतम् ।

शैलपक्षोद्भटास्फोटलुठद्ब्रह्माण्डमण्डपम्।। ३१

दैत्यपार्ष्णिप्रहारौघपतल्लोकेशपत्तनम् ।

नारीहलहलारावरणत्कङ्कणमन्दिरम् ।। ३२

लुठद्दैत्यवलोद्भूतमत्तास्रौघजलान्वितम् ।

रक्तधौतनरौघोग्रमुक्तनादद्रवज्जनम् ।। ३३

लोकपानीकपाम्भोजच्छन्नाच्छन्नयमान्वितम् ।

पुनः सुरासुरैर्घातैर्दृष्टसैन्यकुलाकुलम् ।। ३४

सपक्षपर्वताकारदानवाद्रिगमागमैः ।

वहच्छवशवाशब्दभूरिभाङ्कारभीषणम् ।। ३५

आयुधाग्रविभिन्नोग्रदैत्यपर्वतनिर्झरैः ।

रक्तैररुणिताशेषवसुधार्णवपर्वतम् ।। ३६

उत्सन्नराष्ट्रनगरविपिनग्रामगह्वरम् ।

धृतासंख्यासुरेभाश्वमनुष्यशवपर्वतम् ।। ३७

सुतालोत्तालनाराचराजिरोचितवारणम् ।

मुष्टिप्रहारपिष्टांसमत्तैरावणवारणम् ।। ३८

कल्पाभ्रपटलासारधारादलितपर्वतम् ।

महाशनिविनिष्पेषपिष्टोड्डीनकुलाचलम् ।। ३९

कुपिताग्निज्वलज्ज्वालाजालज्वलितदानवम् ।

एकाञ्जलिपुटानीतसमुद्रोत्सादितानलम् ।। ४०

चण्डदैत्यातिसंभारशिलीकृतमहाज्वलम् ।

वनव्यूहेन्धनाग्न्यर्चिर्द्राविताम्बुशिलोच्चयम् ।। ४१

अस्त्रनिर्मितदुर्वारतमःकल्पान्तरात्रिकम् ।

मायासूर्यगणोद्द्योतैः पीतातनुतमःपटम् ।। ४२

मायाग्निवर्षनिष्पीतकलाभ्रघनवर्षणम् ।

ससीत्काराग्निवमनशस्त्रसंघट्टवर्षणम् ।। ४३

वज्रवर्षास्त्रनिर्धूतशैलवर्षास्त्रसंभ्रमम् ।

निद्राबोधास्त्रयुद्धाढ्यं संघर्षाविग्रहाश्रयम् ।। ४४

वहत्क्रकचवृक्षास्त्रं जलाग्न्यस्मरणान्धितम् ।

ब्रह्मास्त्रयुद्धविषमं तमस्तेजोस्त्रसारितम् ।। ४५

अस्त्रोद्गीर्णायुधानीकनीरन्ध्रसकलाम्बरम् ।

शिलावर्षास्त्रदलितं वह्निवर्षास्त्रभासुरम् ।। ४६

पताकास्पृष्टशशिकैश्चक्रचीत्कारगर्जितैः ।

मुहूर्तेन रथैर्लङ्घितोदयास्तमयाचलम् ।। ४७

वज्रप्रहाराविरतम्रियमाणमहासुरम् ।

शुक्रामरमहाविद्याजीवमानमहासुरम् ।। ४८

विद्रवद्देवसंघातं जयप्रोड्डामरामरम् ।

शुभग्रहमहाकेतुमालिकानामितस्ततः ।। ४९

उत्पातमङ्गलौघानां बुद्धेरुद्धरकन्धरम् ।

साद्रिखोर्वीसमुद्रद्युजगद्रुधिरवारिधि ।। ५०

फुल्लैककिंशुकवनं कुर्वद्दुर्वारवैरतः ।

पर्वतप्रतिमासंख्यं शवपूर्णमहार्णवम् ।। ५१

समग्रतरुशाखाग्रलम्बलोलमहाशवम् ।

दीप्यमानैः स्ववातार्तैः पक्षपुष्पैर्लसत्फलैः ।। ५२

तालोत्तालैः शरव्रातवनैर्व्याप्तनभस्थलम् ।

पर्वतप्रतिमासंख्यकबन्धशतबाहुभिः ।। ५३

नृत्यद्भिः पातिताम्भोदविमानसुरतारकम् ।

शरशक्तिगदाप्रासपट्टिशप्रोतपर्वतम् ।। ५४

लोकसप्तकविभ्रष्टकुड्यखण्डचिताम्बरम् ।

अनारतरसन्मत्तकल्पाभ्रदृढदुन्दुभि ।। ५५

एवं शब्दशतोन्नादपातालतलवारणम् ।

विनायककराकृष्टदीर्घदानवपर्वतम् ।। ५६

एकदिक्करनिष्पन्दसिद्धसाध्यमरुद्गणम् ।

पलायमानगन्धर्वकिन्नरामरचारणम् ।। ५७

वघुरशनिनिपातखण्डिताङ्गा

दलितशिलाशकलाः ककुम्मुखेषु ।

प्रलयसमयसूचकाः सुराणां

सुरतरुघर्घरघस्मराः समीराः ।। ५८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मो० स्थितिप्रकरणे दामव्यालकटसंग्रामवर्णनं नाम षड्विंशः सर्गः ।। २६ ।।